इति सिद्धान्तकौमुदी ॥ एवं बहुतन्त्रीकः पटः । बहुतन्त्रीकं वस्त्रम् ॥

बहुतरकणिशः, पुं, (बहुतराणि कणिशानि धान्यशीर्षाणि यस्य ।) रागीधान्यम् । इति राजनिर्घण्टः ॥

बहुता, स्त्री, बहूनां भावः । बहुशब्दात् तत्वौ भावे इति तप्रत्ययः ॥

बहुतिक्ता, स्त्री, (बहुस्तिक्तो रसो यस्याः ।) काकमाची । इति राजनिर्घण्टः ॥

बहुतिथः, त्रि, (बहु + "बहुपूगगणसङ्घस्य तिथुक्" । ५ । २ । ५२ । इति तिथुक् । मुग्धबोधमते "बहुगणपूगसंघात्तिथट् तलोपश्च ।" ७ । ४२ । इति तिथट् ।) बहूनां पूरणः । इति व्याकरणम् ॥ (यथा, मार्कण्डेयपुराणे । २२ । १ ।

"ततः काले बहुतिथे गते राजा पुनः सुतम् ।
प्राह गच्छाशु विप्राणां त्राणाय चर
मेदिनीम् ॥")

बहुत्र, व्य, (बहु + "सप्तम्यास्त्रल् ।" ५ । ३ । १० । इति त्रल् ।) बहुषु । इति सिद्धान्तकौमुदी ॥

बहुत्वं, क्ली, बहूनां भावः । बहुशब्दात् त्वप्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते । १ । ३५ । ४ ।
"बहुत्वान्नामधेयानि पन्नगानां तपोधन ! ॥")

बहुत्वक्, [च्] पुं, (बह्वस्त्वचो यस्य ।) भूर्ज्जवृक्षः । इति शब्दरत्नमाला ॥

बहुत्वक्कः, पुं, (बहुत्वगेव । बहुत्वच् + स्वार्थे कन् ।) भूर्ज्जवृक्षः । इति हेमचन्द्रः । ४ । २१० ॥

बहुदण्डिकः, त्रि, (बहवो दण्डाः सन्त्यस्य । बहुदण्ड + ठन् ।) बहुदण्डविशिष्टः । यथा । बहुदण्डिका नगरी बहुदण्डिको ग्रामः । इति सिद्धान्तकौमुदी ॥

बहुदुग्धः, पुं, (बहूनि दुग्धानि अपक्वावस्थायां यस्य । यद्वा, बहूनि दुग्धानीव शुक्लवस्तून्यस्य ।) गोधूमः । इति राजनिर्घण्टः ॥

बहुदुग्धा, स्त्री, (बहु दुग्धं यस्याः ।) बहुक्षीरा गौः । तत्पर्य्यायः । बच्चुला २ । इति हेमचन्द्रः । ४ । ३३५ ॥ (स्नुहीवृक्षः । बहुदुग्धविशिष्टत्वात् ॥)

बहुदुग्धिका, स्त्री, (बहुदुग्धा + स्वार्थे कन् । टाप् । अत इत्वम् ।) स्नुहीवृक्षः । इति शब्दचन्द्रिका ॥

बहुधा, व्य, (बहु + "विभाषा बहोर्धा विप्रकृष्टकाले ।" ५ । ४ । २० । इति धा ।) बहुप्रकारम् । इति व्याकरणम् ॥ (यथा, ऋग्वेदे । १ । १६४ । ४६ ।
"एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥"
तथा, गीतायाम् । ९ । १५ ।
"एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥"
"केचित्तु विश्वतो मुखं सर्व्वात्मकं मां बहुधा ब्रह्मरुद्रादिरूपेणोपासते ॥" इति तट्टीकायां श्रीधरस्वामी ॥)

बहुधारं, क्ली, (बह्वी धारा यस्य ।) वज्रम् । इति राजनिर्घण्टः ॥

बहुनाडिकः, त्रि, (बहुनाडि + कन् ।) कायः । इति सिद्धान्तकौमुदी ॥

बहुनाडीकः, त्रि, (बह्व्यो नाड्यो यस्मिन् । बहुनाडी + कप् ।) दिवसः । इति संक्षिप्तसारः ॥ स्तम्भः । इति सिद्धान्तकौमुदी ॥

बहुनादः, पुं, (बहुर्महान् नादः शब्दो यस्य ।) शङ्खः । इति राजनिर्घण्टः ॥

बहुपटुः, त्रि, ईषदूनः पटुः । इति व्याकरणम् ॥ बहुषु कर्म्मसु दक्षश्च ।

बहुपत्रं, क्ली, (बहूनि पत्राण्यस्य ।) अभ्रकम् । इति राजनिर्घण्टः ॥

बहुपत्रः, पुं, (बहूनि पत्राणि दलान्यस्य ।) पलाण्डुः । इति राजनिर्घण्टः ॥ अनेकपत्रयुक्ते, त्रि ॥

बहुपत्रा, स्त्री, (बहुपत्र + टाप् ।) तरणीपुष्पम् । इति राजनिर्घण्टः ॥ (भूम्यामलकी । तत्पर्य्यायो यथा, —
"भूम्यामलकिका प्रोक्ता शिवा तामलकीति च ।
बहुपत्रा बहुफला बहुवीर्य्या जटापि च ॥")
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बहुपत्रिका, (बहुपत्रा + संज्ञायां स्वार्थे वा कन् । टापि अत इत्वम् ।) भूम्यामलकी । मेथिका । (अस्याः पर्य्यायो यथा,
"मेथिका मिथिनिर्मेथिर्दीपनी बहुपत्रिका ।
बोधिनी बहुबीजा च जातिगन्धफला तथा ॥
वल्लरी चैव कामन्था मिश्रपुष्पा च कैरवी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
महाशतावरी । इति राजनिर्घण्टः ॥

बहुपत्री, स्त्री, (बहुपत्र + गौरादित्वात् ङीष् ।) लिङ्गिनी । गृहकन्या । तुलसी । जतुका । बृहती । गोरक्षदुग्धा । इति राजनिर्घण्टः ॥

बहुपर्णः, पुं, (बहूनि पर्णानि पत्राणि यस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ अनेकपत्रयुक्ते, त्रि ॥

बहुपर्णिका, स्त्री, (बहुपर्ण + संज्ञायां कन् । टापि अत इत्वम् ।) आखुकर्णी । इति राजनिर्घण्टः ॥

बहुपर्णी, स्त्री, (बहुपर्ण + गौरादित्वात् ङीष् ।) मेथिका । इति राजनिर्घण्टः ॥ (यथा, —
"मेथिका मिथिनिर्मेथिर्दीपनी बहुपत्रिका ।
बोधिनी बहुबीजा च जातिगन्धफला तथा ॥
वल्लरी चैव कामन्था मिश्रपुष्पा च कैरवी ।
कुञ्चिका बहुपर्णी च पित्तजिह्वाशुशुद्धिधा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बहुपात्, [द्] पुं, (बहवः पादो यस्य । अनेकशिफावत्त्वादस्य तथात्वम् ।) वटवृक्षः । इत्यमरः । २ । ४ । ३२ ॥

बहुपादः, पुं, (बहवः पादा यस्य । अनेकशिफावत्त्वादस्य तथात्वम् ।) वटवृक्षः । इति राजनिर्घण्टः ॥ (यथा, —
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणो वासो बहुपादो वनस्पतिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अनेकपादविशिष्टे, त्रि । यथा, भागवते । ४ । २९ । २ ।
"पुरुषं पुरञ्जनं विद्यात् यद्व्यनक्त्यात्मनः पुरम् ।
एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥"
तथा च महाभारते । १४ । ४२ । ३७ ।
"द्विपादबहुपादानि तिर्य्यग्गतिमतीनि च ॥")

बहुपुत्त्रः, पुं, (बहवः पुत्त्राः सन्ततयो यस्य ।) सप्तपर्णः । इति शब्दचन्द्रिका ॥ अनेकसुतविशिष्टे, त्रि ॥ (यथा, हरिवंशे । ३ । ६४ ।
"बहुपुत्त्रस्य विदुषश्चतस्रो विद्युतः स्मृताः ॥")

बहुपुत्त्री, स्त्री, (बहवः पुत्त्राः पुत्त्रसदृशमूलानि यस्याः ।) शतमूली । इति रत्नमाला ॥ (शतमूलीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

बहुपुष्पः, पुं, (बहूनि पुष्पाणि यस्य ।) पारिभद्रवृक्षः । इति राजनिर्घण्टः ॥

बहुपुष्पिका, स्त्री, (बहुपुष्पा + संज्ञायां कन् । अत इत्वम् ।) धातकी । इति राजनिर्घण्टः ॥

बहुप्रजः, पुं, (बह्व्यः प्रजा यस्य ।) मुञ्जतृणम् । इति राजनिर्घण्टः ॥ शूकरः । इति हेमचन्द्रः । ४ । ३५४ ॥ बहुसन्ततिविशिष्टे, त्रि ॥ (छन्दसि तु "बहुप्रजाश्छन्दसि ।" ५ । ४ । १२२ । इति असुभागान्तः । यथा, सिद्धान्तकौमुद्यां वैदिकप्रक्रिया ।
"बहुप्रजा निरृतिमाविवेश ॥")

बहुप्रतिज्ञः, त्रि, (बह्व्यः प्रतिज्ञाः यस्मिन् ।) अनेक-पदसङ्कीर्ण-पूर्व्वपक्ष-विशिष्ट-व्यवहारः । यथा । "यत्तु अनेकपदसङ्कीर्णः पूर्व्वपक्षो न सिध्यतीति । तत्र यद्यनेकवस्तुसङ्कीर्ण इत्युच्यते तदा न दोषः । मदीयमनेन हिरण्यं वासो रूपकादि वापहृतमित्येवंविधस्यादुष्टत्वात् । ऋणादानपदसङ्करे पक्षाभास इति चेत् तदपि न मदीया रूपका अनेन वृद्ध्या गृहीताः सुवर्णञ्चास्य हस्ते निक्षिप्तं मदीयं क्षेत्रमपहरति चेत्यादीनां पक्षत्वमिष्यते एव । किन्तु क्रियाभेदात् क्रमेण व्यवहारो न युगपदित्येतावत् । यथाह कात्यायनः ।
'बहुप्रतिज्ञं यत् कार्य्यं व्यवहारेषु निश्चितम् ।
कामन्तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सयेति ॥'
तस्मादनेकपदसङ्कीर्णः पूर्व्वपक्षो युगपन्न सिध्यतीति तस्यार्थः ।" इति मिताक्षरा ॥ अनेकप्रतिज्ञायुक्ते, त्रि ॥

बहुप्रदः, त्रि, (प्रददातीति प्रदः । प्र + दा + क । बहूनां प्रदः ।) प्रचुरदाता । तत्पर्य्यायः । वदान्यः २ स्थूललक्ष्यः ३ दानशौण्डः ४ । इत्यमरः । ३ । १ । ६ ॥ स्थूललक्षः ५ दानवीरः ६ दानपूर्णः ७ । इति शब्दरत्नावली ॥ (पुं, महादेवः । यथा, महाभारते १३ । शिवसहस्रनामकथने । १७ । १०८ ।
"कुलहारी कुलकर्त्ता बहुविद्यो बहुप्रदः ॥")